"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः ॥")
कौटिल्यम् । ग्रन्थिपर्णवृक्षः । (यथा, चरके सूत्रस्थाने तृतीयेऽध्याये ।

"मनःशिला त्वक्कुटजात् सकुष्ठः
सलोमशः सैड़गजः करञ्जः ।
ग्रन्थिश्च भौर्ज्जः करवीरमूलं
चूर्णानि साध्यानि तुषोदकेन ॥")

बन्धनम् । रुग्भेदः । इति मेदिनी । थे । ६ ॥
तस्य निदानसंप्राप्ती यथाह माधवकरः ।

"वातादयो मांसमसृक्प्रदुष्टाः
सन्दूष्य मेदश्च तथा शिराश्च ।
वृत्तोन्नतं विग्रथितन्तु शोथं
कुर्व्वन्त्यतो ग्रन्थिरिति प्रदिष्टः ॥"

तस्य वातिकरूपं यथा,—

"व्यायम्यते वृश्चति तुद्यते च
प्रभंश्यते मथ्यति भिद्यते च ।
कृष्णो मृदुर्व्वस्तिरिवाततश्च
भिन्नः स्रवेच्चानिलजोऽसमच्छम् ॥"

पैत्तिकरूपं यथा,—

"दंदह्यते धूप्यति चुष्यते च
पापच्यते प्रज्वलतीव चापि ।
रक्तः सपीतोऽप्यथवापि पित्तात्
भिन्नः स्रवेदुष्णमतीव चास्रम् ॥"

श्लैष्मिकरूपं यथा,—

"शीतो विवर्णोऽल्परुजोऽतिकण्डूः
पाषाणवत्संहननोपपन्नः ।
चिराभिवृद्धिश्च कफप्रकोपा-
द्भिन्नः स्रवेच्छुक्लघनञ्च पूयम् ॥"

(अथास्य ससम्प्राप्तिकलक्षणं यथा,—
"कफप्रधानाः कुर्व्वन्ति मेदोमांसासृगामलाः ।
वृत्तोन्नतं यं श्वयथुं सग्रन्थिर्ग्रथनात् स्मृतः ॥
दोषासृमांसमेदोऽस्थि शिराव्रणभवा नव ।
ते तत्र वातादायामतोदभेदान्वितोऽसितः ॥
स्थानात् स्थानान्तरगतिरकस्माद्धानिवृद्धिमान् ।
मृदुर्वस्तिरिवानद्धो विभिन्नोऽच्छस्रवत्यसृक् ॥
पित्तात् सदाहः पीताभो रक्तो वा पच्यते द्रुतम् ।
भिन्नोऽस्रमुष्णं स्रवति श्लेष्मणा नीरुजो घनः ॥
शीतः सवर्णः कण्डूमान् पक्वः पूयं स्रवेद्घनम् ।
दोषैर्दुष्टेऽसृजि ग्रन्थिर्भवेन्मूर्च्छत्सु जन्तुषु ॥
शिरामांसञ्च संश्रित्य सस्वापः पित्तलक्षणः ।
मांसलैर्दूषितं मांसाहारैश्च ग्रन्थिमावहेत् ॥
स्निग्धं महान्तं कठिनं शिरानद्धं कफाकृतिम् ।
प्रवृद्धं मेदुरैर्मेदोनीतं मांसेऽथवा त्वचि ॥
वायुना कुरुते ग्रन्थिं भृशं स्निग्धं मृदुं चलम् ।
श्लेष्मतुल्याकृतिं देहक्षयवृद्धिक्षयोदयम् ॥
स विभिन्नो घनं मेदस्ताम्रासितसितं स्रवेत् ।
अस्थिभङ्गाभिघाताभ्यामुन्नतावनतन्तु यत् ॥
सोऽस्थिग्रन्थिः पदान्ते च सहसाम्भोऽवगाहनात् ।
व्यायामाद्वा प्रतान्तस्य शिराजालं सशोणितम् ॥
वायुः सम्पीड्य सङ्कोच्य वक्रीकृत्य विशोष्य च ।
निष्फुरं नीरुजं ग्रन्थिं कुरुते स शिराह्वयः ॥
असंरूढे रूढमात्रे वा व्रणे सर्व्वरसाशिनः ।
सार्द्रे वा बन्धरहिते गात्रेऽश्माभिहतेऽथवा ॥
वातासमसृतं दुष्टं संशोष्य ग्रथितं व्रणम् ।
कुर्य्यात् सदाहः कण्डूमान् व्रणग्रन्थिरयं स्मृतः ॥
साध्या दोषास्रमेदोजा न तु स्थूलखराश्चलाः ।
मर्म्मकण्ठोदरस्थाश्च———————॥"
इति वाभटेनोत्तरस्थाने २९ अध्याये उक्तम् ॥)
तस्य चिकित्सा यथा,—
"स्वर्ज्जिकामूलकक्षारः शङ्खचूर्णसमन्वितः ।
एतेन विहितो लेपो हन्ति ग्रन्थिं तथार्व्वुदम् ॥

ग्रन्थिर्न यो नश्यति भेषजेन
निष्कास्य तं शस्त्रचिकित्सकेन ।
जात्यादिपक्वेन घृतेन वैद्यो
व्रणेन चान्येन च सञ्चिकित्सेत् ॥

ग्रन्थीनुद्धृत्य पश्चात्तु व्रणोक्तं क्रममाचरेत् ।
शिराग्रन्थिं विहायान्ये शेषे शस्त्रं प्रयुञ्जते ॥
अन्ये आचार्य्याः ।" इति भावप्रकाशः ॥
("ग्रन्थिष्वामेषु कर्त्तव्या यथास्वं शोफवत् क्रिया ।
बृहतीचित्रकव्याघ्रीकणासिद्धेन सर्पिषा ॥
स्नेहयेच्छुद्धिकामञ्च तीक्ष्णैः शुद्धस्य लेपनम् ।
संस्वेद्य बहुशो ग्रन्थिं विमृद्नीयात् पुनः पुनः ॥
एष वाते विशेषेण क्रमः पित्तास्रजे पुनः ।
जलौकसो हिमं सर्व्वं कफजे वातिको विधिः ॥
तथाप्यपक्वं छित्त्वैनं स्थिते रक्तेऽग्निना दहेत् ।
साध्यशेषं सशेषो हि पुनराप्यायते ध्रुवम् ॥
मांसव्रणोद्भवौ ग्रन्थी पाटयेदेवमेव च ।
कार्य्यं मेदोभवेऽप्येतत्तप्तैः फालादिभिश्च तम् ॥
प्रमृद्यात्तिलदिग्धेन छन्नं द्विगुणवाससा ।
शस्त्रेण पाटयित्वा वा दहेन्मेदसि सूद्धृते ॥
शिराग्रन्थौ नवे पेयं तैलं साहचरन्तथा ।
उपनाहोऽनिलहरैर्वस्तिकर्म्मशिराव्यधः ॥")

अङ्गैकदेशेष्वनिलादिभिः स्यात्
स्वरूपधारी स्फुरणः शिराभिः ।
ग्रन्थिर्महान्मांसभवस्तु नर्ति-
र्मेदोभवः स्निग्धतमश्चलश्च ॥
तं शोधितं स्वेदितमश्मकाष्ठैः
साङ्गुष्ठदण्डैर्विनयेदपक्वम् ।
विपाट्य चोद्धृत्य भिषक् सकोषं
शस्त्रेण दग्ध्वा व्रणवच्चिकित्सेत् ॥
अदग्ध ईषत् परिशोधितश्च
प्रयाति भूयोऽपि शनैर्विवृद्धिम् ।
तस्मादशेषः कुशलैः समन्ता-
च्छेद्यो भवेद्वीक्ष्य शरीरदेशान् ॥
शोथे क्षते पाकवशेन शीर्य्येत्
ततः चलोत्थः प्रसरेद्विसर्पः ।
उपद्रवं तं प्रतिवारयेज्ज्ञः
स्वैर्भेषजैः पूर्व्वतरैर्यथोक्तैः ॥
ततः क्रमेणास्य यथाविधानं
व्रणं व्रणज्ञस्त्वरया चिकित्सेत् ॥"

इति चरके चिकित्सास्थाने १७ अध्यायः ॥

अपरा चिकित्सा च यथा,—

"ग्रन्थिष्वथामेषु भिषग्विदध्या-
च्छोफक्रियाया विहितं विधिज्ञः ।
रक्षोघ्नलाधापि वरस्य नित्यं
तद्भावितं व्याधिबलं निहन्ति ॥
तैलं पिबेत् सर्पिरथो द्वयं वा
दत्त्वा वसां वा त्रिवृतं विदध्यात् ।
अपेहि वातादशमूलसिद्धं
वैद्यश्चतुःस्नेहमथो द्वयं वा ॥
हिंस्राथ रोहिण्यमृताथ भार्गी
श्योनाकबिल्वागुरुकृष्णगन्धाः ।
गोजी च पिष्टा सह तालपत्र्या
ग्रन्थौ विधेयोऽनिलजे प्रलेपः ॥
स्वेदोपनाहान् विविधांश्च कुर्य्या-
त्तथा प्रसिद्धानपरांश्च लेपान् ।
विदार्य्य वा पक्वमपोह्य पूयं
प्रक्षाल्य बिल्वार्कनरेन्द्रतोयैः ॥
तिलैः सपञ्चाङ्गुलपत्रमिश्रैः
संशोधयेत् सैन्धवसंप्रयुक्तैः ।
शुद्धं व्रणं चाप्युपरोपयेयु-
स्तैलेन रास्ना सवलान्वितेन ॥
विड़ङ्गयष्टीमधुकामृताभिः
सिद्धेन वाक्षीरसमन्वितेन ।
जलौकसः पित्तकृते हितास्तु
क्षीरोदकाभ्यां परिषेचनञ्च ॥
काकोलिवर्गस्य च शीतलानि
पिबेत् कषायाणि सशर्कराणि ।
द्राक्षारसेनेक्षुरसेन वापि
चूर्णं पिबेच्चापि हरीतकीनाम् ॥
मधूकजम्ब्वर्ज्जुनवेतसानां
त्वग्भिःप्रदाहानवचारयेत ।
सशर्करैर्वा तृणशून्यकन्दै-
र्दिह्यादभीक्ष्णं मुचुकुन्दजैर्व्वा ॥
विदार्य्य वा पक्वमपोह्य पूयं
धावेत् कषायेण वनस्पतीनाम् ।
तिलैः सयष्टीमधुकैर्विशोध्य
सर्पिः प्रयोज्यं मधुरैर्विपक्वम् ॥
हृतेषु दोषेषु यथानुपूर्व्व्या
ग्रन्थौ भिषक् श्लेष्मसमुत्थिते तु ।
स्विन्नस्य विम्लापनमेव कुर्य्या-
दङ्गुष्ठलोहोपलवेणुदण्डैः ॥
विकङ्कतारग्वधकाकजन्ती
काकादनी तापसवृक्षमूलैः ।
आलेपयेत् पिण्डफलार्कभार्गी
करञ्जकालामदनैश्च विद्वान् ॥
अमर्म्मजातं शममप्रयात-
मपक्वमेवापहरेद्विदार्य्य ।
दहेत् स्थिते वासृजि सिद्धकर्म्मा
सद्यः क्षतोक्तञ्च विधिं विदध्यात् ॥
या मांसकन्द्यः कठिना वृहत्य-
स्ताश्चैव योज्यस्तु विधिर्विधिज्ञैः ।
शस्त्रेण चापाद्य सुपक्वमाशु
प्रक्षालयेत् पथ्यतमैः कषायैः ॥
संशोधनैस्तञ्च विशोधयेयुः
क्षारोत्तरैः क्षौद्रघृतप्रगाढ़ैः ।